ततो दक्षिणानामिकाग्रगृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात् ।यथासंख्येन मंत्र-चतुष्टम्। ॐ त्र्यायुषं जमदग्नेरिति ललाटे। ॐ कश्यपस्य त्र्यायुषं इति ग्रीवायाम् ।ॐ यद्देवषु त्र्यायुषं इति दक्षिण-बाहुमूले । ॐ तन्नो अस्तु त्र्यायुषं इति हृदि । ततो व्यस्तपारिभ्यां पृथिवीं स्पृशन् प्रथमं वैश्वानरं सम्बो-ध्याभिवादयेत्। तत्रामुकगोत्रोऽहममुकप्रवरोऽहममुक-शर्माऽहं भो वैश्वानर त्वामभिवादये इति प्रकारः ततस्त-थैव वरुणं सम्बोध्याभिवादयेत् । तथैवाचार्यं चाभि-

---

फिर दाहिने हाथ की अनामिका अंगुलीसे स्रुवे की भस्म लेकर माथे गले दक्षिणबाहुमूल और हृदयमें त्र्यायुष करे अर्थात् इन सब स्थानों में स्रुवे की उपरोक्त भस्म लगानी चाहिये। उसके क्रमसे निम्नलिखित चार मंत्र ये हैं। यथा-'ॐ त्र्यायुष जमदग्नेः' यह मंत्र उच्चारण करके माथे में, 'ॐ कश्यपस्य त्र्यायुषं' यह मंत्र बोलकर कण्ठ में, 'ॐ यद्देवेषु त्र्यायुषं' यह मंत्र बोलकर दक्षिणबाहुमूल में और 'ॐ तन्नो अस्तु त्र्यायुषं' यह मंत्र उच्चारण करके हृदय में लगानी चाहिये। फिर व्यस्तपाणि अर्थात् बायें हाथ के ऊपर दाहिने हाथ को पट्ट रखकर भूमि को स्पर्श करता हुआ प्रथम अग्निको सम्बो-धन करके प्रणाम करे। उसका क्रम यह है-'अमुकगोत्रो-ऽहममुकप्रवरोऽहममुकशर्माहं भो वैश्वानर त्वामभिवादये' यह अभिवादन करनेकी रीति है।फिर इसी प्रकार वरुणको संबोधन करके प्रणाम करना चाहिये। उसका वाक्य यह है। यथा-'अमुकगोत्रोऽहममुकप्रवरोऽहममुकशर्माहं भो वरुण त्वामभि-

वादयेत्। ततः आयुष्मान् भव सौम्य इत्याचार्यो ब्रूयात्। ततोऽग्नेरुत्तरतः प्रागग्रान्कुशानास्तीर्य तदुपरि दक्षिणोत्तरक्रमेणासादितवारिपूर्णकलशाष्टतये कलशानां पुरतः प्रागग्रेषु कुशेषु स्थित्वा एकस्मादाम्रपल्लवेनोदकं गृहीत्वा ॐ येऽपस्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूदूषुरिंद्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि। इति मंत्रेण। ततः तेन मामभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय इत्यात्मानमभिषिंचति। ततो द्वितीयघटस्थमुदकं गृह्णाति-ॐ येप्स्वंतरग्नय० इति मंत्रेण गृहीताम्रपल्लवे-

---

वादये' इसी प्रकार आचार्यको अभिवादन करे। यथा-'अमुकगोत्रोऽहममुकप्रवरोऽहममुकशर्माहं भो आचार्य त्वामभिवादये' अभिवादन करने के अनन्तर-'आयुष्मान् भव सौम्य' इस प्रकार आचार्य आशीर्वाद देवे। तत्पश्चात् अग्निके उत्तरसे पूर्व को अग्र भागवाले कुशाओं को बिछाकर दक्षिण उत्तर को जलसे भरकर रखे हुए आठ कलशो के आगे पूर्वाग्रकुशों को बिछावे और उस पर (ब्रह्मचारी) बैठकर उन आठ कलशों के बीच एक कलश में से आमके पत्तेद्वारा आगे लिखे 'ॐ येप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूदूषुरिंद्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि इस मंत्रसे जल लेवे और फिर इस आगे लिखे 'तेन मामभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय।' मन्त्र से अपने शरीर में सेचन करे। फिर दूसरे कलश से आम के पत्ते द्वारा पूर्वोक्त 'ॐ येप्स्वंतरग्नयः' मंत्र से जल ग्रहण करे और आगे

नाभिषिंचति । ॐ येन श्रियमकृणुतां येनावमृष्यता ँ सुरां येनाक्ष्यावभ्यषिंचतां यद्वा तदश्विना यशः ॥ इति मंत्रेण । ततस्ते नैव क्रमेण पुनः ॐ येप्स्वंतरग्नय० इत्यनेन तृतीयकलशस्थजलमादाय ॐ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे । इति मंत्रेणाभिषिच्य तेनैव क्रमेण ॐ येप्स्वंतरग्नय० इति मंत्रेण चतुर्थकलशस्थजलमादाय । ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ इति मंत्रेणभिषिच्य पुनः पंचमकलशस्थं जलं ॐ येप्स्वंतरग्नय० इति मंत्रेण तथैवादाय ॐ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः॥ इति मंत्रेणाभिषिच्य ततोऽवशिष्टकलशत्रितयजलं तथैव

लिखे 'ॐ येन श्रियमकृणुतां येनावमृष्यता ँसुरा येनाक्ष्यावभ्यषिंचतां यद्वा तदश्विना यशः।' इस मंत्र से अपने शरीर पर सेचन करे। फिर जल ग्रहण करने के पूर्वोक्त मंत्रसे आमके पत्ते द्वारा तीसरे कलशका जल लेकर आगे लिखे 'ॐ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥' इस मंत्र से शरीरमें सेचन करे। अनन्तर जल ग्रहण के उसी मंत्र से आम के पत्तेद्वारा चौथे कलशका जल लेकर आगे लिखे 'ॐ यो वःशिवतमो रसस्तस्य भाजयतेह नः।उशतीरिव मातरः' इस मंत्रसे अपने शरीर को सेचन करे। फिर जल ग्रहण के पूर्वोक्त मंत्रसे आमके पत्ते द्वारा पांचवें कलश का जल लेकर आगे लिखे 'ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥' इस मंत्रसे अपने शरीर में सेचन करे।

येप्स्वंतरग्नय० इति मंत्रेण प्रत्येकं गृहीत्वा तूष्णीं प्रत्येकमभिषिंचति । ततो मेखलामोचनं शिरोभागेन-ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ँश्रथाय । अथा-वयमादित्यव्रते तवानागसो अदितये स्याम ।इति मंत्रेण। दंडकृष्णाजिने तूष्णीं भूमौ निधाय अन्यद्वस्त्रं परिधायोत्तरीयं च कृत्वाऽचम्य बद्धांजलिरादित्यमुपतिष्ठेत ब्रह्मचारी।ॐ उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात् प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद् दिवायावभिरस्थाच्छतसनिरसि शतसनिंमा कुर्वाविदन्मा गमयोद्यन् भ्राजभृष्णुरिंद्रो मरुद्भिरस्थात्सायंयावभिरस्थात् स-

---

पश्चात् शेष रहे हुए तीन कलशोंके बीच प्रत्येक कलशमें से पूर्वोक्तजल ग्रहणके मंत्रद्वारा आमके पत्तेसे जल लेकर क्रमानुसार अपने शरीर में चुपचाप सेचन करे फिर मूंज की मेखला को शिरकी ओर से आगे लिखे 'ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ँश्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम०' इस मंत्र को उच्चारण करके निकाल देवे। अनंतर दण्ड और काली मृगछालाको चुपचाप रख देवे। फिर दूसरा वस्त्र और उत्तरीय वस्त्र धारणपूर्वक आचमन करे पश्चात् ब्रह्मचारी हाथ जोड़कर आगे लिखे 'ॐ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात् प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद् दिवायावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमयोद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायंयावभिरस्थात्सहस्रसनिरसि

हृत्नसनिरसि सहत्नसनिं मा कुर्वाविदन्मा गमय।इतिमंत्रेण ततोदधितिलान्वा प्राश्याचम्य जटालोमनखादींश्छेदयित्वास्नात्वाऽऽचम्य प्रादेशमितोदुंबरकाष्ठेनदंतधावनम्। ॐ अन्नाद्याय व्यूहध्वँ सोमो राजाऽयमागमत् । समे मुखं प्रमाक्ष्र्यते यशसा च भगेन च ।। इति मंत्रेण । ततो दंतकाष्ठं परित्यज्याचम्य सुगंधिद्रव्योद्वर्तनानन्तरं स्नात्वा द्विराचम्य चन्दनकुंकुमादिना नासिकाया मुखस्यालंभने ॐ प्राणापानौ मे तर्प्पय । ॐ चक्षुर्मे तर्प्पय । ॐ श्रोत्रं मे तर्प्पय । इति मंत्रेणानुलिंपति । ततः पाणी प्रक्षाल्य

सहस्रनिं मा कुर्वाविदन्मा गमय' इस मंत्रका उच्चारण करता हुआ सूर्यनारायणके संमुख खड़ा हो जाय। फिर दही और तिल इन दोनों वस्तुओंको मिलाकर चख लेवे पीछे आचमन करले तदनंतर नाईके द्वारा क्षौर (हजामत) कराकर जटा लोम नाखून कटवावे और स्नान करके आचमन करे फिर प्रादेशप्रमाण गूलरकी दँतौन आगे लिखे 'ॐ अन्नाद्याय व्यूहध्वँ सोमो राजाऽयमागमत् । स मे मुखं प्रमाक्ष्र्यते यशसा च भगेन च' इस मंत्रको उच्चारण करके करनी चाहिये। पश्चात् दतौनको फेंक देवे और कुल्ला करके फिर आचमन करे तिस पीछे सुगन्धित पदार्थों द्वारा शरीरमें उबटन करे और फिर स्नानपूर्वक दो बार आचमन करे। फिर चन्दन केशर इत्यादि सुगन्धित द्रव्य ग्रहणपूर्वक 'प्राणापानौ मे तर्पय' यह मंत्र बोलकर नासिका और मुख में लगावे। 'ॐ चक्षुर्मे तर्पय' यह मंत्र उच्चारण करके नेत्रों में और 'श्रोत्रं मे तर्पय' यह मंत्र पढ़कर कानों में लगाना चाहिये। फिर हाथ धोकर दक्षिणकी

दक्षिणाभिमुखः पातितवामजानुः कृतापसव्यो द्विगुण-भुग्नकुशत्रयतिलजलान्यादाय आस्तृतकुशत्रयोपरि पितॄंस्तर्पयेत् ।ॐ पितरः शुंधध्वमिति मंत्रेण ।ततः सव्यंकृत्वा आचम्यानुलिप्य जपेत्-ॐ सुचक्षा अहमक्षीभ्यां भूयासँ्सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां भूयासम् इति । ततोऽहत-वासः परिधानम् ।ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं जीवामि शरदः पुरूची रायस्पो-षमभिसंव्ययिष्ये ।। इति मंत्रेण । ततो यज्ञोपवीतपरि-धानम्-ॐ यज्ञोपवीतं परमंपवित्रं प्रजापतेर्यत्सहजं पुर-स्तात् । आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बल-मस्तु तेजः ।। इति मंत्रेण । द्वितीयग्रहणम्-यज्ञोपवीत-

---

ओर को मुख किये ब्रह्मचारी वामजानुको नवायकर जनेऊको अपसव्य (उल्टा)कर दुहरे लपेटे हुए तीन कुश तिल और जल लेकर पृथ्वीमें बिछाये हुए तीन कुशोंके ऊपर आगे लिखे 'ॐ पितरः शुंधध्वम्' इस मंत्रको उच्चारण करके पितरों का तर्पण करे। फिर यज्ञोपवीत सव्य (सीधा)करके आचमन करे।पश्चात् कुछ सुगन्धित द्रव्योंको लेपन कर आगे लिखे 'ॐ सुचक्षा अहम-क्षीभ्यां भूयासँ्सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां भूयासम्' इस मंत्रको पाठ करना चाहिये।फिर आगे लिखे ॐ परिधास्यै यशो-धास्यै दीर्घायुत्वाय जरदष्टिरस्मि।शतं च जीवामि शरदःपुरूची-रायस्पोषमभिसंव्ययिष्ये' इस मंत्र से नवीन वस्त्र पहर लेवे अनंतर दूसरा यज्ञोपवीत धारण करने के लिये आगे लिखा 'ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्। आयुष्य-मग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः' यह मन्त्र

मिति प्रजापतिर्ऋषिर्यजुरुपवीतदेवता यज्ञोपवीतपरिधाने विनियोगः । यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि । आचनम् । अयोत्तरीयम्-ॐ यशसामा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् ।। इति मंत्रेण । ततः पुष्पमालाग्रहणे मंत्रः-ॐ या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च। इति मंत्रेण पुष्पमालाग्रहणम् । ततः पुष्पमालापरिधानम्-ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु । तेन संग्र-

---

उच्चारण करके यज्ञोपवीतको हाथमें लेले। फिर दूसरा यज्ञोपवीत धारण करने के लिये जल हाथमें ले आगे लिखे हुए 'यज्ञोपवीतमिति प्रजापतिर्ऋषिर्यजुरुपवीतदेवता यज्ञोपवीतपरिधाने विनियोगः' इस वाक्यको उच्चारण करके उसका विनियोग छोड़े और फिर आगे लिखे हुए 'ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि' इस मंत्रसे (उस) यज्ञोपवीत को धारण कर लेना चाहिये। पश्चात् आचमन करे फिर आगे लिखे हुए 'ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्' इस मंत्रसे उत्तरीयवस्त्र[1] धारण करे। तत्पश्चात् आगे लिखे 'ॐ या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च' इस मंत्र से पुष्पमाला को हाथ में ग्रहण करना चाहिये। फिर उस पुष्पमाला को आगे लिखे 'ॐ यद्यशोऽप्सरसामिन्द्रश्च-

---

१. दुपट्टा

थिताः सुमनस आबध्नामि यशो मयि।।इति मंत्रेण पुष्पमालापरिधानम् ।अथ वसुप्रतिष्ठा ।अथोष्णीषेण शिरोवेष्टनम्-ॐ युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयंतः ।। इति मंत्रेण । ततः कुण्डले परिदधाति। ॐ अलंकरणमसि भूयोऽलंकरणं भूयात्। ततोऽञ्जनम् -वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि। तत आदर्शे आत्मदर्शनम्-ॐ रोचिष्णुरसि इति मंत्रेण। ततश्छत्रग्रहणम्-ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मान्तर्धेहि इति मंत्रेण । ततः पद्भ्यामुपानहौ प्रतिगृह्णाति-ॐ प्रतिष्ठे स्थो विश्वतो

कार विपुलं पृथु। तेन संग्रथिताः सुमनस आबध्नामि यशो मयि' इस मंत्रको उच्चारण करके पहर लेना चाहिये। अथ वसुप्रतिष्ठा। तदनन्तर पगड़ी या टोपी आगे लिखे 'ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः' इस मंत्रसे धारण करे। इसके पश्चात् आगे लिखे 'ॐ अलङ्करणमसि भूयोऽलंकरणं भूयात्' इस मंत्रसे कुण्डल धारण करे। फिर आगे लिखे ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा अति चक्षुर्मे देहि' इस मंत्रसे अञ्जन धारण करे अर्थात् आंखों में काजल लगावे। फिर आगे लिखे 'ॐ रोचिष्णुरसि' इस मंत्रसे दर्पण में मुख देखे। पश्चात् आगे लिखे ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो माऽन्तर्धेहि' इस मंत्रसे छतरी धारण करे। फिर आगे लिखे 'ॐ प्रतिष्ठे रथो विश्वतो मा पातम्, इस मंत्रसे

मा पातम् इति मंत्रेण । ततो वैणवदण्डधारणम्-ॐ विश्वोभ्योमानाष्ट्राभ्यस्परि पाहि सर्वतः इतिमंत्रेणततः स्नातकस्य नियमाः-गानवादित्रनृत्यत्यागः न तत्र गमनं क्षेमेसति न रात्रौग्रामान्तरगमनम् न धावेत न कूपेऽवेक्षणं न वृक्षारोहणं न फलत्रोटनम् अमार्गेण न गच्छेत् नग्नो न स्नायात् न संधिशयनं न विषमभूमिलंघनम् अश्लीलं नोपवदेत्, उदितास्तसमये सूर्यं नोपपश्येत् जलमध्ये सूर्यं आकाशस्थं न पश्येत् देवे वर्षति न गच्छेत् उदके

पैरोंमें उपानह (चर्मपादुका) धारण करे। अनंतर आगे लिखे 'ॐ विश्वाभ्यो मानाष्ट्राभ्यस्परिपाहि सर्वतः' इस मंत्रसे लकड़ी (लाठी)हाथमें लेवे।तत्पश्चात् ब्रह्मचर्य अवस्थापूर्वक विद्याध्ययन करलेनेपर समावर्त्तन संस्कारके द्वारा गृहस्थाश्रममें आये हुए नियम।यथा-गाने, बजाने और नाचनेका त्याग करे और न ऐसे स्थानमें जावे। विशेषकार्य उपस्थित हुए विना रातके समय एक गांव से दूसरे गांव में न जाय, दौड़कर नहीं चले। कुए में मुँह डालकर नहीं झांके। वृक्ष पर नहीं चढ़े। कच्चे फलों को नहीं तोड़े। विना दरवाजे के घरमें न घुसे अर्थात् दरवाजे के होते हुए छोटी मोटी दीवार लांघकर कभी घरमें नहीं घुसे दरवाजेसे ही प्रवेश करे। नग्न (बिलकुल नंगा) होकर स्नान नहीं करे। सूर्यके उदय तथा अस्त समय में नहीं सोवे। विषमभूमि अर्थात् ऊंची नीची पृथ्वी को लांघकर गमन न करे। अश्लीलवचन (गालीगलौच) नहीं बोले। उदय और अस्त होते हुए सूर्य को नहीं देखे। आकाशस्थ सूर्य की परछांही को जल के बीच में न देखे। वर्षा होते हुए समय में रास्ता न चले। जल में

आत्मानं न पश्येत् अजातलोम्नीं प्रमत्तां पुरुषाकृतिं षण्ढां न गच्छेदित्यादि । ततः आचार्य्याय वरां दक्षिणां दद्यात् । ततः मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कवि ँसम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा । इति मंत्रेण फलपुष्पसमन्वितघृतपूर्णस्रुवेण माणवकदक्षिणकरस्पृष्टेनोत्थाय पूर्णाहुतिमाचार्य्यः कुर्य्यादिति । उपविश्य स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषं जमदग्नेरिति ललाटे । ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायाम् । ॐ यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले । ॐ तन्नो अस्तु त्र्यायुषमिति हृदि । इति त्र्यायुषं कुर्यात्

अपने शरीर को नहीं देखे। जिसके रोम न निकले हों, बावली पुरुषाकृति (जिस स्त्रीके पुरुषकी नाईं दाढ़ी मूछ निकल आई हैं जैसी गिंदिया हीजड़ी) इनके पास न जाय और न इनकी हाँसी ही उड़ावे। तदनंतर अपने आचार्य को उत्तम दक्षिणा देवे फिर आगे लिखे हुए 'ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कवि ँसम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा' इस मंत्रसे फल पुष्प तथा घृतसे परिपूर्ण स्रुवे को उठाय उसमें बालक का हाथ लगवाय आचार्य पूर्णाहुति करे। फिर आसन पर बैठकर स्रुवे में भस्म ग्रहणपूर्वक दाहिने हाथ की अनामिका अंगुलीद्वारा उस स्रुवेसे भस्मलेकर त्र्यायुष करे। 'ॐ त्र्यायुषं जमदग्नेः' ऐसा उच्चारण करके माथेमें 'ॐ कश्यपस्य त्र्यायुषं' ऐसा उच्चारण करके गलेमें 'ॐ यद्देवेषु त्र्यायुषम्' ऐसा उच्चारण करके दक्षिणबाहु-

अनेनैव क्रमेण कुमारललाटादावपि तत्र 'तन्नो' इत्यस्य स्थाने 'तत्ते' इति विशेषः । ततो मूर्द्धाक्षतादिग्रहणम् ।।

इति श्रीमहामत्तकमहासामंताधिपतिश्रीरामदत्त विरचिता वाजसनेयिनामुपनयन कर्मपद्धतिः समाप्ता ।।१२।।

मूलमें और 'ॐ तन्नो अस्तु त्र्यायुषम्' ऐसा उच्चारण करके उस भस्मको हृदय में लगाना चाहिये। इसी प्रकार यह भस्म कुमार के भी ललाटादि स्थानों में लगावे। किन्तु जब कुमार के लगावे तो 'तन्नो अस्तु' के स्थान में 'तत्ते अस्तु' ऐसा उच्चारण करना चाहिये। फिर कुमार के माथे में तिलक अक्षत लगाकर अभिषेकादि करे।। इतिसमावर्तनम् ।।१२।।

अथ सामग्री

रोली १२ मोली ७ केशर २५ बतासे ३ आटा चावल पुष्प १२ पुष्प माला धूप ३ दीप १ ताम्बूल ७ यज्ञोपवीत ९ प्रणीता-पात्र ३ प्रोक्षणीपात्र ३ कांस्यपात्र ६ छायापात्र १ सुवर्ण १ कुशा १ स्रुवा १ गोमय एरणेगोहे पलाशसमिधा १ सेर ३ पूर्ण पात्र ३ उपर्णे ५ धोतियाँ २ कुपीनी ५ मृगचर्म १ पलाशदण्ड १ गूलरशाखा १ मेखला मुंजी की १ सुहालीयासेर १ पुरवा ८ लोटिया ८ नारियल २ खंडाऊं जोड़ा१ पट्टी १ चंगेर १ लाठी ५ गुथली १ कसारु २ घृततिल ३ दधि १ सुपारी ११ आम्र पल्लव वृक्षादिपत्र ७ अंजन १ दर्पण १ वसु ५ मोती उपानहौ वटणश्वेत दूर्वा दोने १० अबीरश्वेत ६ ब्राह्मणभोजन दक्षिणा पंच रंग २५। इति सामग्री।।

इति श्रीमहामत्तकमहासामन्ताधिपतिश्रीरामदत्तविरचिता वाजसनेयिनामुपनयनकर्मपद्धतिर्मुरादाबादनिवासि-कात्यायनगोत्रोत्पन्नपण्डित-कन्हैयालालमिश्रकृतहिन्दीटीकासहिता समाप्ता ।।

अथ विवाहविधिः ॥१३॥

तत्र कन्याहस्तेन षोडशहस्तमितं मण्डपं तद्दक्षिण-दिशि पश्चिमां दिशमाश्रित्य मण्डपसंलग्नमुत्तराभिमुखं कौतुकागारं मंडपाद्बहिरीशान्यां दिशि जामातृचतुर्हस्त-परिमितिसिकतादिपरिष्कृततुषकेशशर्करादिरहितां रम्यां वेणुनिर्मितां वेदिं च कारयेत्। विवाहदिने कृतनि-त्यक्रियेण जामातृपित्रा मातृपूजापूर्वकमाभ्युदयिक श्राद्धं कर्तव्यम् । कन्यापिता स्नातः शुचिः शुक्लाम्बरधरः कृत नित्यक्रियो मातृपूजाभ्युदयिके कृत्वा अर्हणवेलायां मण्डपेप्रत्यङ्मुखःप्राङ्मुखं वरमूर्ध्वजानुं तिष्ठन्तं संबोध्य ततः स्वस्तिवाचनं कलशगणेशादीनां पूजनं च कृत्वा

अब विवाहसंस्कार वर्णन किया जाता है-कन्या के हाथ से सोलह हाथ पृथ्वी नापकर पश्चिमदिशासे पूर्वको मण्डप बनाना चाहिये। उस मण्डपकी दक्षिणकी तरफ पश्चिमदिशा से युक्त और मण्डपसे सटे हुए उत्तरकी ओर मुखवाले कौतुकागार की रचना करे। मण्डपसे बाहर ईशानकोन में जामाता (वर) के चार हस्त प्रमाण वालुकाद्वारा सुशोभित, भुस्सी, केश, धूलि इत्यादि से रहित वाँसों से रची हुई मनोहर (दर्शनीय) वेदी बनावे। विवाहके दिन नित्यकृत्य अर्थात् स्नान संध्यादि कर जामाता का पिता षोडश मातृकाओं की पूजा पूर्वक नान्दी-मुख श्राद्ध करे। कन्या का पिता स्नान संध्यापूर्वक पवित्र होकर सफेद वस्त्र धारण किये मातृपूजा और नान्दीमुख श्राद्ध करके वर के पूजन का समय आने पर मण्डप में पश्चिमाभिमुख से बैठे हुए तथा पूर्वाभिमुख और ऊर्ध्वजानु स्थित वर को सम्बोधन

ॐ साधु भवानास्तामितिप्रजापतिर्ऋषिर्ब्रह्मादेवता यजुर्वेरार्चने विनियोगः । ॐ साधु भवानास्तामर्चयिष्यामो भवन्तमिति ब्रूयात् ।ॐ अर्चयेति वरेणोक्ते वरोपवेशनार्थे शुद्धमासनं दत्त्वा विष्टरमादाय ॐ विष्टरो विष्टरो विष्टर इत्यन्येनोक्ते ॐविष्टरः प्रतिगृह्यतामिति दाता वदेत् ॐ विष्टरं प्रतिगृऽामि इत्यभिधाय वरो विष्टरंगृहीत्वा ॐ वर्ष्मोऽस्मीत्याथर्वणऋषिर्विष्टरो देवताऽनुष्टुप्छन्दः उपवेशने विनियोगः । ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासति।।इत्यनेनासने उत्तराग्रविष्टरोपरि वर उपविशति।

करके स्वस्तिवाचन, कलशस्थापन तथा गणेशादिकों का पूजन करके हाथ में जल ले आगे लिखे हुए 'ॐ साधु भवानास्तामिति प्रजापतिर्ऋषिर्ब्रह्मा देवता यजुर्वरार्चने विनियोगः' इस वाक्य से विनियोग छोड़े फिर 'ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्' इस प्रकार कन्या का पिता कहे। पश्चात् 'ॐ अर्चय' ऐसा वर के कहने पर वर के बैठनेको शुद्ध आसन देकर कुश के बनाये विष्टर को हाथ में ले 'ॐ विष्टरो विष्टरो विष्टरः'ऐसा किसी पाधाके कहनेपर-ॐ विष्टरः प्रतिगृह्यताम्' इस प्रकार दाता (कन्याका पिता) कहे फिर 'ॐ विष्टरं प्रतिगृह्णामि' ऐसा कहकर वर विष्टरको ले हाथमें जल ग्रहणपूर्वक आगे लिखे हुए 'ॐ वर्ष्मोऽस्मीत्याथर्वणऋषिर्विष्टरो देवता अनुष्टुप् छन्दःउपवेशने विनियोगः'इस वाक्यको उच्चारण करके विनियोग छोड़े फिर आगे लिखे हुए 'ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभि-

तत्रोपविश्ययजमानःपाद्यमञ्जलिनाऽऽदाय ॐपाद्यं पाद्यं पाद्यमित्यन्येनोक्ते ॐपाद्यं प्रतिगृह्यतामिति दाता वदेत्। ॐपाद्यं प्रतिगृह्णामि इत्यभिधाय यजमानाञ्जलितोऽञ्जलिना पाद्यमादाय वरः विराजो दोहोऽसीति प्रजापतिर्ऋषिरापो देवता यजुःपादप्रक्षालने जलग्रहणे विनियोगः।ॐविराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजोदोहः इति दक्षिणपादं प्रक्षालयति।अनेनैवक्रमेणानेनैवमंत्रेणान्यपादप्रक्षालनम्।ततःपूर्ववद्विष्टरांतरं गृही-

---

दासति' इस मंत्रको उच्चारणपूर्वक वर अपने आसनमें विष्टर का उत्तरकी ओर अग्रभाग करके उसके ऊपर बैठ जावे। फिर कन्याका पिता आसनमें बैठकर एक पात्र में जल भर उसको हाथ में लेवे और 'ॐ पाद्यं पाद्यं पाद्यं' ऐसा किसी अन्य पाधाके कहने पर 'ॐ पाद्यं प्रतिगृह्यताम्' ऐसा कन्याका पिता कहे 'फिर ॐ पाद्यं प्रतिगृह्णामि' ऐसा कहकर वर यजमानके हाथसे उस जलपात्र को लेकर आगे लिखे हुए 'ॐ विराजो दोहोसीति[1] प्रजापतिर्ऋषिरापो देवता यजुः पादप्रक्षालने जलग्रहणे विनियोगः' इस वाक्यसे विनियोग छोड़े।पश्चात् आगेलिखे हुए "ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः" इस मंत्रसे दाहिने चरणको धोवे फिर इसी मंत्र और इसी रीतिसे बाँये चरण को धोवे अनन्तर कन्या का पिता दूसरा विष्टर लेकर वरको देवे और वर उसे उत्तरको अग्रभाग करके अपने आसन के नीचे रख लेवे। फिर दूब अक्षत फल

---

१ विनियोग के निमित्त और जल लेना चाहिये।

त्वा चरणयोरधस्तात् उत्तराग्रंवरःकुर्यात्।ततो दूर्वाक्षत-फलपुष्पचन्दनयुतार्घपात्रं गृहीत्वा यजमानः ॐ अर्घोऽ-र्घोऽर्घः इत्यन्येनोक्ते ॐ अर्घः प्रतिगृह्यतामि दाता वदेत्। ॐ अर्घंप्रतिगृह्णामीत्यभिधाय यजमानहस्तादर्घंगृहीत्वा ॐ आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानीति शिर-स्यक्षतादिकं किंचिद्दत्वा ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टास्माकं वीरा मा परासेचि म-त्पयः इत्यर्घपात्रस्थं जलमैशान्यां दिशि त्यजन् पठति। ततः आचमनीयमादाय ॐ आचमनीयमाचमनीयमाच-मनीयमित्यन्येनोक्ते ततो वरः-ॐ आचमनीयं प्रति-गृह्णामीत्यभिधाय यजमानहस्तादाचमनीयमादाय ॐ

पुष्प चन्दन युक्त अर्घ्यपात्र को कन्या का पिता हाथ में ले 'ॐ अर्घोऽर्घोऽर्घः' ऐसा किसी दूसरे पाधा के कहने पर 'ॐ अर्घः प्रतिगृह्यताम्' ऐसा कन्या का पिता कहे। ॐ अर्घं प्रतिगृह्णामि वर ऐसा उच्चारण पूर्वक यजमान के हाथ से उस अर्घपात्र को लेकर ईशानकोन में उसके जल को छोड़ता हुआ आगे लिखे 'ॐ आपः स्थ युष्माभिः सर्वान् कामानवाप्नवानि' इससे शिर पर अक्षत देकर 'ॐ समुद्रं वः प्रहिणोमि स्वां योनि-मभिगच्छत। अरिष्टास्माकं वीरा मा परासेचि मत्पयः' इस मंत्र का पाठ करे। अर्थात् 'ॐ आपः स्थ युष्माभिः सर्वान्का-मानवाप्नवानि' यह उच्चारण करके मस्तक में अक्षत लगावे। फिर आचमन के लिये एक पात्र में जल भरकर कन्या का पिता हाथमें लेवे और फिर 'ॐ आचमनीयमाचमनीयमाचमनीयम्' ऐसा कन्याके पिता के कहनेपर वर 'ॐ आचमनीयं प्रतिगृ-

आमागन्यशसा स्ँसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामारिष्टिंतनूनाम् इत्यनेनसकृदाचामेत्। द्विस्तूष्णीम् । ततो यजमानः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितान्यादाय ॐ मधुपर्कों मधुपर्कों मधुपर्कः इत्यन्येनोक्ते ॐ मधुपर्कः प्रतिगृह्यतामिति दाता वदेत् । ॐ मधुपर्कं प्रतिगृह्णामि इति वरो वदेत् ।ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे इति यजमानकरस्थमेव निरीक्ष्य ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीत्यनेन

ह्लामि' ऐसा कहकर यजमान के हाथ से उस आचमनीय जलपात्रको लेकर आगे लिखे हुए 'ॐ आमागन्यशसा स्ँसृज वर्चसा तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनां' इस मन्त्र से एक बार आचमन करे। फिर दो बार चुपचाप आचमन करे। तदनन्तर कन्या का पिता कांसी के पात्र में दही सहत घृत इन तीन वस्तुओं को मिलाकर दूसरे कांसी के पात्रद्वारा उस पात्र को ढककर हाथ में ले 'ॐ मधुपर्कों मधुपर्कों मधुपर्कः' ऐसा पाधा के कहने पर 'ॐ मधुपर्कः प्रतिगृह्यताम्' ऐसा दाता (यजमान) कहे। फिर 'ॐ मधुपर्कं प्रतिगृह्लामि' इस प्रकार वर कहे। तत्पश्चात् 'ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे' ऐसा कहकर यजमान के हस्त स्थित मधुपर्कको देख आगे लिखे हुए 'ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्लामि' इस मन्त्रद्वारा कन्या के पिता के हाथसे मधुपर्क को लेकर बायें हाथमें रखे। फिर दाहिने हाथ की अनामिका और अंगुष्ठ इन दो अंगुलियों

मधुपर्कं गृहीत्वा वामहस्ते कृत्वा ॐ नमः श्यावास्याया-न्नशने यत्त आविद्धंतत्ते निष्कृंतामीत्यनामिकयाऽङ्गुष्ठेन च त्रिः प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां भूमौ किंचिन्निक्षिपेत् । पुनस्तथैव द्विः प्रत्येकं क्षिपेत् । ततो वरः ॐ यन्मधुन इति कुत्स ऋषिर्मधुपर्को देवता जगती छंदो मधुपर्कप्राशने विनियोगः ॐ यन्मधुनो मधव्यं परम ँरूपन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपे-णान्नाद्येन परमो मधव्योऽन्नादोऽसानि इत्यनेन वारत्रयं मधुपर्कप्राशनम् । प्रतिप्राशनै चैतन्मंत्रपाठः । ततो मधु-पर्कशेषमसंचरदेशे धारयेत् । ततो द्विराचम्य ॐ वाङ् म आस्येस्तु ॐ न नसोर्मे प्राणोऽस्तु ॐ अक्ष्णोर्मे चक्षु-

---

से आगे लिखे 'ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि'। इस मन्त्रद्वारा उन पात्रस्थ, घृत, मधु, दधि इनको तीन बार मिलावे फिर उसमें से यत्किंचित् पृथ्वी में गिरा देवे। फिर दो बार थोड़ा थोड़ा पृथ्वी पर गिरावे अनंतर हाथमें जल लेकर आगे लिखे 'ॐ यन्मधुन इति कुत्सऋषिर्मधु-पर्को देवता जगती छन्दो मधुपर्कप्राशने विनियोगः'इस वाक्यसे विनियोग छोड़े। इसके पश्चात् आगे लिखे हुए 'ॐ यन्मधुनो मधव्यं परम् ँ रूपमन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणा-न्नाद्येन परमो मधव्योन्नादोऽसानि' इस मन्त्र से तीन बार उस मधुपर्क का प्राशन करे, किन्तु मन्त्र को प्रत्येक प्राशन के समय उच्चारण करना चाहिये। फिर शेष रहे मधुपर्क को किसी एकान्त स्थान में रख देवे। पश्चात् दो बार आचमन करे। तदनन्तर 'ॐ वाङ् म आस्येऽस्तु' यह मन्त्र उच्चारण

रस्तु ॐ कर्णयोर्मे श्रोत्रमस्तु ॐ बाह्वोर्मे बलमस्तु ॐ ऊर्वोर्मे ओजोऽस्तु ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहसन्तुइत्यास्यादि प्रत्येकं सर्वगात्राणि स्पृष्ट्वा ॐ गौर्गौ-र्गौरित्यन्येनाभिहिते यजमानेन प्रत्युक्तं ततो वरः ॐ माता रुद्राणां दुहिता वसूना ँ स्वसादित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मागामनाममदितिं वधिष्ट । मम चामुष्य पाप्मा हतः ॐ उत्सृजत तृणान्य-त्त्विति तृणं छिंद्यात्ततो वेदिकायां तुषकेशशर्करादि-रहितायां हस्तमात्रपरिमितायां चतुरस्रां भूमिं कुशैः

करके दाहिने हाथ से मुख को स्पर्श करे। ॐ नसोर्मे प्राणो-ऽस्तु' यह मंत्र उच्चारण करके नासिका के दोनों छिद्रोंको स्पर्श करे। 'ॐ अक्ष्णोर्मे चक्षुरस्तु' यह मन्त्र उच्चारण करके दोनों आँखों को स्पर्श करे। ॐ कर्णयोर्मे श्रोत्रमस्तु' यह मन्त्र उच्चा-रण करके दोनों कानों को स्पर्श करे। 'ॐ बाह्वोर्मे बलमस्तु' यह मन्त्र उच्चारण करके हाथों को स्पर्श करे। 'ॐ ऊर्वोर्मे ओजोऽस्तु' यह मन्त्र उच्चारण करके जंघाओं को स्पर्श करे। 'ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सहसन्तु' यह मन्त्र उच्चारणपूर्वक मुखसे आरंभ करके समस्त शरीरका स्पर्श करे। फिर 'ॐ गौर्गौर्गौः' यजमान के ऐसा कहने पर वर आगे लिखे 'ॐ माता रुद्राणां दुहिता वसूना ँस्वसादित्यानाममृतस्य नाभिः। प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट। मम चामुष्य पाप्मा हतः ॐ उत्सृजत तृणान्यत्तु' इस मन्त्र को उच्चारण करके तिनके को तोड़कर डाल देवे। फिर भुस्सी, केश, धूरि, कंकर इत्यादि रहित एक हाथकी बराबर बनाई हुई

परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां पांसुमुद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रस्थं वह्निमग्निकोणादानीय प्रत्यङ्मुखमुपसमाधाय तद्रक्षार्थं कंचिन्नियुज्य कौतुकागाराद्वरः कन्यामानीय मंडपे उपविश्य ॐ जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा।शतं च जीव शरदः सुवर्चारयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वा

चौकोन वेदीको तीनकुशाओंसे शोधन करे और फिर उन कुशाओंको ईशानकोनमें डाल देवे। तदनन्तर गोबर से वेदी को लीप कर स्फ्य नामक यज्ञपात्र अथवा स्रुवे से पूर्वको अग्र भागवाली दक्षिण से उत्तर की तरफ को तीन रेखा खैंचे। रेखा खैंचने के क्रमानुसार दाहिने हाथ की अनामिका तथा अंगुष्ठ इन दो अंगुलियों द्वारा (उन रेखाओंसे) मिट्टी उठाकर ईशान कोनमें फेंक देवे फिर जल लेकर रेखाओं पर छिड़कना चाहिये पीछे चुपचाप कांसीके पात्रमें अग्नि लेकर अग्निकोन के मार्ग से वेदीके समीप आकर अग्निको पश्चिमाभिमुख वेदी में स्थापन करे। फिर उस अग्नि की रक्षा के लिये किसी को नियुक्त कर कौतुकागार से वर उस कन्या को लाकर मण्डपमें बैठे। अनन्तर आगे लिखे हुए 'ॐ जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा। शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वास' इस मंत्रको उच्चारण करके उस कन्याको पहरने के वस्त्र प्रदान करे। तत्पश्चात् आगे लिखे

परिधानवस्त्रं तस्यै ददाति वरः।ततः ॐया अकृंतन्नवयन् या अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ । तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वोत्तरीयं ददाति । ततो वरः ॐ परिधास्यै यशोधास्यै दीर्घायुत्वायजरदष्टिरस्मि।शतं च जीवामिशरदः पुरूची रायस्पोषमभिसंव्ययिष्ये इति पठित्वा अधोवस्त्रं वरः परिधत्ते । ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती। यशो भगश्चमाविदद्यशो मा प्रतिपद्यताम्।इति पठित्वोत्तरीयं परिदधाति वरः । ततो वरस्य कन्यायाश्च द्विराचमनम् ।ततः कन्याप्रदेन परस्परं समञ्जेथाम् इति प्रेषणं कन्यावरयोःपरस्परमभिमुखीकरणम्।ॐसमञ्जन्तु

'ॐ या अकृंतन्नवयन् या अतन्वत याश्च देवीस्तन्तूनभितो ततथ। तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः' इस मंत्र को उच्चारण करके कन्याको उत्तरीय वस्त्र प्रदान करना चाहिये। फिर वर आगे लिखे 'ॐपरिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि।शतश्च जीवामि शरदःपुरूची रायस्पोषमभिसंव्ययिष्टे' इस मंत्रको उच्चारणकरके अपने आप भी अधोवस्त्र (धोती इत्यादि) धारण करे।तत्पश्चात् आगे लिखे 'ॐ यशसा मा द्यावापथिवी यशसेन्द्राबृहस्पती।यशो भगश्च माविदद्यशो मा प्रतिपद्यताम्' इस मंत्रको बोलकर वर उत्तरीयवस्त्र धारण करे। फिर वर और कन्या दो दो आचमन करे फिर कन्या का पिता वर और कन्याको परस्पर सम्मुख (आमने सामने) बैठाकर उन दोनोंके परस्पर एक दूसरे से देखनेकी आज्ञा देवे। उस काल वर आगे लिखे 'ॐ समन्ञ्जतु विश्वेदेवाः समापो हृदयानि नौ।संमा-

विश्वेदेवाः समापो हृदयानि नौ । संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ ।। इति वरः पठति । ततः कन्याप्रद-कर्तृकं ग्रन्थिबन्धनम् । बंधनं कन्यावरयोः । अथ हस्त लेपनं शाखोच्चारणम् ।अथ कन्यादानम् ।दाता शङ्खस्थ-दूर्वाक्षतफलपुष्पचन्दनजलान्यादाय जामातृदक्षिणकरो-परि कन्यादक्षिणकरं निधाय ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम्। वरोऽसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः ।। इति पठित्वा गोत्रोच्चारणं कुर्यात् । ॐ अद्या-मुकमासीयामुकपक्षीयामुकतिथौ अमुकवासरे अमुक-गोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय, अमुकगोत्र-स्यामुकप्रवरस्यामुकशर्मणः पौत्राय, अमुकगोत्रस्यामु-

---

तरिश्वा संधाता समुद्रेष्ट्री दधातु नौ' इस मंत्रका पाठ करे। फिर कोई कन्यापक्षीय पाधा अथवा पुरोहित कन्याका और वर का ग्रन्थिबंधन (गण्ठजोड़ा) करे। अनंतर कन्या और वर के हाथों में हलदी लेपन पूर्वक दोनों पक्ष के पुरोहित या पाधा शाखोच्चार करें। फिर यजमान कन्यादान करे। कन्या का पिता शंखमें दूर्वाक्षत फल पुष्प चन्दन तथा जल रखकर जामाताके दाहिने हाथ पर कन्या का दाहिना हाथ रख 'ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम्। वरोऽसौ विष्णुरूपेणप्रतिगृह्णात्वयं विधिः।।' यह मंत्र पाठपूर्वक गोत्रोच्चारण करे। कन्यादान का संकल्प। यथा-ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकवासरे अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राय। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्राय। अमुकगोत्रस्या-

कप्रवरस्यामुकशर्मणः पुत्राय । अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीम् । अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम् । अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम् इत्यनेन क्रमेण त्रिरावर्त्य पठनीयम् । अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे वराय अमुकगोत्रां अमुकप्रवरां अमुकनाम्नीं इमां कन्यां सालङ्कारां प्रजापतिदैवत्यां स्वर्गकामः पत्नीत्वेन तुभ्यमहं संप्रददे । ॐ स्वस्तीति प्रतिवचनम् ।ॐ द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णातु इति वरः पठेत् । ततः कन्याप्रदः ॐ अद्य

मुकप्रवरस्यामुकशर्मणः पुत्राय[1] अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीम्। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रीम्। अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रीम्। इत्यनेन क्रमेण त्रिरावर्त्त्य पठनीयम्। अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे वराय अमुकगोत्रां अमुकप्रवरां अमुकनाम्नीमिमां कन्यां सालंकारां प्रजापतिदैवत्यां स्वर्गकामः पत्नीत्वेन तुभ्यमहं सम्प्रददे' तब वर 'ॐ स्वस्ति' कहकर उस कन्यादान को ग्रहण करे। फिर वर आगे लिखे 'ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु' इस मंत्र को उच्चारण करे। तत्पश्चात् कन्या का पिता आगे लिखा 'अद्य कृतैतत्कन्या-

---

१ इस स्थान में प्रत्येक श्लोक के अंतमें 'पुत्राय' तक तीनों पीढ़ी के नामों के अमुकपद की जगह गोत्रप्रवर वेद शाखा सूत्रों के नामों का उच्चारण करना चाहिये। गोत्रशाखोच्चारण यहां 'त्रिरावर्त्य पठनीयं' पदका तात्पर्य यह है कि 'अमुकगोत्रस्य' से लेकर 'अमुक शर्मणः पुत्रीम्' यहां तक का पाठ तीन वार पढ़कर फिर आगे के संकल्प का उच्चारण करना चाहिये।।

कृतैतत्कन्यादानप्रतिष्ठार्थं इदं सुवर्णमग्निदैवतं अमुकगोत्रायअमुकप्रवराय अमुकशर्मणे वराय दक्षिणांतुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ।ॐ स्वस्तीतिप्रतिवचनम् । गोमिथुनं वा दद्यात्।ॐकोदात्कस्मा अदात्कामोऽदात्कामायादात् ।कामो दाता कामः प्रतिग्रहीता कामैतत्ते इति वरः पठेत् । ततस्तां पाणौ गृहीत्वा ॐ यदैषि मनसा दूरं दिशोनुपवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु । श्रीअमुकदेवी इति पठन्निष्क्रामति । ततो वेदि-

---

दानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं अमुकगोत्राय अमुकप्रवराय अमुकशर्मणे वराय दक्षिणां तुभ्यमहं सम्प्रददे' यह संकल्प उच्चारण करके सुवर्ण या गोमिथुन (एक गाय एक बैल) वर को दक्षिणास्वरूप देवे। तब उसको भी वर 'ॐ स्वस्ति' ऐसा कहकर ले लेवे। जिसके अन्तर्गत है ऐसे संकल्प के पीछे वर 'ॐ स्वस्ति' उच्चारण करके 'ॐ द्यौस्त्वा' मंत्र का पाठ करे। फिर कन्यादान करने वाला पिता संकल्पपूर्वक अपने सामर्थ्य के अनुसार सुवर्ण अथवा एक गौ और एक बैल वर के निमित्त कन्यादानकी दक्षिणा में प्रदान करे और वर 'ॐ कोदात्' इत्यादिमंत्र उच्चारण करके उसको ग्रहण कर लेवे। और आगे लिखे 'ॐ कोऽदात्कस्मा अदात् कामोऽदात् कामायादात् कामो दाता कामः प्रतिगृहीता कामैतत्ते' इस मंत्रको पढ़े। और फिर कन्या के हाथको पकड़कर आगे लिखे 'यदैषि मनसा दूरं दिशोनुपवमानो वा हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोतु श्रीअमुक देवी' इस मंत्र को उच्चारण करता करता फिर वेदी के समीप आवे। फिर वेदी के दक्षिण

दक्षिणस्यां दिशिवारिपूर्णदृढ़कलशं ऊर्द्धंतिष्ठतो मौनिनः पुरुषस्य स्कंधे अभिषेकपर्यन्तं धारयेत् । ततः परस्परं समीक्षेथां इति कन्याप्रदप्रैषानंतरं ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ।सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयोऽग्निष्टे पतिस्तुरीयस्तेमनुष्यजाः। सोमोऽदद्द्गन्धर्वाय गन्धर्वोऽददग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम । सा नः पूषा शिवतमा मैरय सा न उरू उशती विहर । यस्यामुशंतः प्रहराम शेफं यस्यामु कामा बहवो निविष्टचै ।इति वरपठितमंत्रांते परस्परं निरीक्षणम्। ततोऽग्निं प्रदक्षिणीकृत्य पश्चादग्नेरहतवस्त्रवेष्टिततृणपुलके कटे वा तदुपरिदक्षिणं

दिशा में जल से भरा हुआ दृढ़कलश कन्धेपर रखकर चुपचाप एक मनुष्य अभिषेकपर्यंत खड़ा रहे। पीछे कन्या का पिता तथा वरको आपसमें एक दूसरे के देखने की आज्ञा देवे। तब वर आगे लिखे 'ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यःसुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे।सोमःप्रथमो विविदेगन्धर्वो विषिद उत्तरः। तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः सोमोऽददद् गन्धर्वाय गन्धर्वोऽददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्।सा नःपूषाशिवतमा मैरय सा न ऊरू उशती विहर। यस्यामुशंतः प्रहराम शेफं यस्यामु कामा बहवो निविष्टचै इस मंत्रको उच्चारण करेऔर तब दोनों जन परस्पर एक दूसरेको देखें। फिर वधू वर अग्निकी प्रदक्षिणा करे अग्नि के पश्चिमकी ओर नवीन वस्त्रसे लपेटे हुए घासके पूले या चटाईके

चरणं दत्त्वा वधूं दक्षिणतः कृत्वा तामुपवेश्य स्वयमुपविश्यवरः पुष्पचन्दनतांबूलवस्त्राण्यादाय ॐअद्य कर्तव्यविवाहहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन होतृत्वेन च त्वामहं वृणे इति ब्राह्मणं वृणुयात् । ॐ वृतोऽस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु इति वरेणोक्ते ॐ करवाणीति ब्राह्मणो वदेत् ।

ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि पागग्रान् कुशानास्तीर्य ब्राह्मणमग्निं प्रदक्षिणक्रमेणानीयात्र त्वं मे ब्रह्मा भवेत्यभिधाय कल्पितासने उपवेशयेत् । ॐ अद्य कर्तव्यविवाहकर्मणि कृताकृतावेक्षणरूपाचार्यकर्म कर्तु-

---

ऊपर दाहिने चरणको रख और वधूको वर अपने दाहिनी ओर बैठाकर आप भी बैठे फिर पुष्प, चन्दन, ताम्बूल, वस्त्र इन वस्तुओं को हाथ में लेकर 'अद्य कर्तव्यविवांहहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन होतृत्वेन च त्वामहं वृणे' ऐसा कहकर ब्राह्मण का वरण करे। तब 'ॐ वृतोऽस्मि' ऐसा ब्राह्मण कहे। फिर 'यथाविहितं कर्म कुरु' ऐसा वर के कहने पर 'ॐ करवाणि' ऐसा ब्राह्मण कहे। तत्पश्चात् अग्निके दक्षिण की ओर शुद्ध आसन बिछाकर उसपर पूर्वको अग्रभाग वाले कुशा बिछाय ब्रह्माको अग्निकी प्रदक्षिणा के क्रमानुसार समीप बुलाय 'त्वं मे ब्रह्मा भव' ऐसा कह उसको उस आसन पर बैठा देवे फिर 'ॐ अद्य कर्तव्यविवाहकर्मणि कृताकृतावेक्षणरूपाचार्यकर्म कर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूल-

ममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूल-वासोभिः आचार्यत्वेन त्वामहं वृणे । ॐ वृतोऽस्मीति प्रतिवचनम् । ततः प्रणीतापात्रं पुरतः कृत्वा वारिणाऽऽपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम्-बर्हिषश्चतुर्थ-भागमादाय आग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यंतं नैर्ऋत्या द्वायव्यान्तम् अग्नितः प्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चि-मदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रम-नन्तर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली सम्मा-र्जनार्थं कुशत्रयम् उपयमनार्थं वेणीरूपकुशत्रयं समिध-

---

वासोभिः आचार्यत्वेन त्वामहं वृणे' इस प्रकार कहकर आचार्य का वरण करे, तब आचार्य 'ॐ वृतोऽस्मि ऐसा कहे। फिर प्रणीतापात्र को आगे रखकर जलसे भर देवे और उसको कुशा-ओंसे ढककर ब्रह्माके मुखको देख अग्निके उत्तरकी ओर कुशाओं पर धर देवे। फिर परिस्तरण करे अर्थात् मुट्ठीभर या सौ कुश हाथमें लेकर उसके चार भाग करे उनमें पहला भाग अग्निकोन से ईशानकोन तक, दूसरा भाग ब्रह्मा के आसन से अग्नि वेदी तक, तीसरा भाग नैर्ऋतकोनसे वायुकोनतक और चौथा भाग अग्निग्ने प्रणीतापर्यंत बिछा देना चाहिये। अनंतर अग्नि से उत्तर की तरफ पश्चिमदिशा में पवित्र छेदनके लिये तीन कुशा रखे और पवित्र बनाने के लिये अग्रभाग सहित और बीच के पत्ते से रहित अर्थात् जिसके भीतर अन्य कुशपत्र न हों दो कुश पत्र रखें। फिर प्रोक्षणीपात्र आज्यस्थाली संमार्जन कुशाओं के

स्तिस्रः स्रुव आज्यं षट्पञ्चाशदुत्तरमुष्टिशतद्वयाव-च्छिन्नतण्डुलपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् । अथ तस्यामेव दिशि असाधारण-वस्तून्युपकल्पनीयानि । तत्र शमीपलाशमिश्रा लाजाः दृषदुपलं कुमारीभ्राता शूर्पः दृढपुरुषः अन्यदपि तदु-पयुक्तमालेपनादिद्रव्यम् । ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यां उत्तराग्रे

लिये तीन कुशा[1] उपयमन के लिये कुशा वेणीरूप[2] करके रखे तीन समिधा स्रुवा आज्य और दो सौ छप्पन मुट्ठी चावलों से भरा हुआ पूर्ण पात्र इन सब वस्तुओं को पवित्रछेदन की कुशा-ओंसे आगे पूर्व पूर्व की तरफ को क्रम से रखता जाय। इसके उपरांत उसी दिशा में इन असाधारण वस्तुओं को भी इकट्ठी करे। वे यहं हैं-शमी (जड़वृक्ष) की पत्तों से युक्त खीलें, पत्थर, लड़की का भाई, सूप (छाज), कोई एक दृढ़ पुरुष तथा और भी उस विवाहकार्य के योग्य आलेपनादि द्रव्य रखे। फिर पवित्र छेदन की कुशाओं से पवित्र को छेदन कर पवित्रसहित प्रणीता के जल को हाथ में लेकर तीन वार प्रोक्षणीपात्र में डाले। फिर दाहिने हाथ की अनामिका और अंगुष्ठ इन दो अंगुलियों से पवित्रों के अग्रभाग को आगे करके ग्रहण करे। पश्चात् प्रोक्षणी पात्र का जल तीन वार ऊपर

---

१ प्रचलित पांच कुशा । २ कलावे से लपेट चोटी की समान आकार बनाकर रखे।

पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्यहस्ते करणं अनामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेन प्रोक्षणीजलेन यथासादित वस्तुसेचनं ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानम् । आज्यस्थाल्यमाज्यनिर्वापः ततोऽधिश्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणक्रमेण वह्नौ तत्प्रक्षेपः पर्यग्निकरणं ततः स्रुवप्रतपनं कृत्वा सम्मार्जन कुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेन अभ्युक्ष्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् । तत आज्यस्याग्नेरवतारणं तत आज्ये प्रोक्षणीवदुत्पवनं

को उछाले और प्रोक्षणीपात्र को बाँये हाथ में रखकर दाहिने हाथ की अनामिका और अंगुष्ठ इन दो अंगुलियों से पवित्रोंको ग्रहण कर तीन वार जलको ऊपर (आकाशकी ओर) सेचन करे। प्रणीता और प्रोक्षणी के जलसे पूर्वस्थापित सब वस्तुओं को सेचन करे तत्पश्चात् उस प्रोक्षणीपात्र को अग्नि और प्रणीता के बीचमें रख देना चाहिये। फिर आज्यस्थाली में घृत डालकर अग्निपर चढ़ा देवे और पीछे एककुश बालकर प्रदक्षिण क्रमसे घृतको चारों ओर उसको घुमाता हुआ अग्निमें डाल देवे। इसके पीछे पर्यग्निकरण करे। अनंतर स्रुवे को अग्नि में तपाकर संमार्जन कुशाओं के अग्रभाग से स्रुवे के भीतर और मूलभाग से बाहर स्रुवे को शुद्धकर प्रणीता के जलसे सेचनपूर्वक फिर दूसरी वार तपावे और तब उसको अग्नि के दक्षिण की ओर रख देवे। फिर उस घृतको अग्निसे उतार लेवे तत्पश्चात् आज्यको प्रोक्षणीपात्र की नाईं पवित्रों से उछाले और देखे यदि उसमें

अवेक्ष्य सत्यपद्रव्ये तन्निरसनं पुनः प्रोक्षण्युत्पवनं ततः उपयमनकुशानादाय उत्तिष्ठन्प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्तास्तिस्रः समिधः क्षिपेत् ।तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निपर्युक्षणं कृत्वा प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति। तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ प्रजापतये स्वाहा इदं प्रजापतये० इति मनसा । ॐ इन्द्राय स्वाहा इदमिन्द्राय०। इत्याघारौ ।।ॐ अग्नये स्वाहा इदमग्नये०।

कोई मक्खी इत्यादि अपवित्र वस्तु पड़ी हो तो उसको निकालकर फेंक देना चाहिये। फिर प्रोक्षणीपात्र के जल को पवित्रों से उछाले तदनंतर उपयमनकुशाओं को बायें हाथ में लेकर खड़ा हो जाय और पूर्वस्थापित तीन समिधाओं को घृत में भिजोकर 'स्वाहा' शब्द के साथ मन में प्रजापति का ध्यान करके चुपचाप अग्नि में डाल देवे। फिर आसन पर बैठकर पवित्रों सहित प्रोक्षणीपात्र का जल हाथ में लेकर अग्नि के चारों तरफ सेचन करे और फिर पवित्रों को प्रणीतापात्रमें रख देवे। अनंतर दाहिनी जानुको नवाय करके कुशके द्वारा ब्रह्मा से मिलित हो जलती हुई अग्निमें स्रुवे के द्वारा घृतकी आहुति देवे। इन आहुतियोंमें आधार आहुतियों से लेकर बारह आहुतियोंतक स्रुवे में रहे शेष घृत को प्रोक्षणीपात्र में डालता जाय। ॐ प्रजापतये स्वाहा इदं प्रजापतये० । इति मनसा । ॐ इन्द्राय स्वाहा इदमिन्द्राय० । इत्याघारौ । ॐ अग्नये स्वाहा

ॐ सोमाय स्वाहा इदं सोमाय० । इत्याज्यभागौ । ॐ भूः स्वाहा इदमग्नये० । ॐ भुवः स्वाहा इदं वायवे० । ॐ स्वः स्वाहा इदं सूर्याय० । एता महाव्याहृतयः । त्वन्नो अग्ने इति वामदेव ऋषिःअग्नीवरुणौ देवते त्रिष्टुप्-छन्दो होमे विनियोगः । ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः ।यजिष्ठो वह्नितमः शोशु-चानो विश्वा द्वेषा ँसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरु-णाभ्यां० । ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुण ँरराणो व्वीहि मृडी-क ँसुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां० । अया-श्चाग्नेइति वामदेवऋषिःअग्निर्देवता त्रिष्टुप्छंदःसर्वप्राय-श्चित्तहोमे विनियोगः । ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया असि । अयानो यज्ञं वहास्ययानो धेहि

इदमग्नये० । ॐ सोमाय स्वाहा इदं सोमाय० । इत्याज्यभागौ।। ॐ भूः स्वाहा इदमग्नये० ॐ भुवः स्वाहा इदं वायवे० । ॐ स्वः स्वाहा इदं सूर्याय० । एता महाव्याहृतयः ।। त्वन्नो अग्ने इति वामदेवऋषिःअग्नीवरुणौ देवते त्रिष्टुप्छन्दो होमे विनि-योगः।ॐत्वन्नो अग्नेवरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्याम्। ॐ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुण ँरराणो व्वीहि मृडीक सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्याम्०। अयाश्चाग्ने इति वामदेव ऋषिः अग्निर्देवता त्रिष्टुप् छन्दः सर्व-प्रायश्चित्तहोमे विनियोगः । ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च

भेषज ँस्वाहा इदमग्नये० । ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्क्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च० । ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम्ँ श्रथाय । अथा व्वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय० । एताः प्रायश्चित्त-संज्ञकाः । ततोऽन्वारब्धं विना ॐ प्रजापतये स्वाहा इदं प्रजापतये० ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० । उदकोपस्पर्शनम् । अथ राष्ट्रभृतः । ॐ

सत्वमित्वमया असि। आयानो यज्ञं वहास्ययानो धेहि भेषजँ स्वाहा इदमग्नये० । ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विश्वेभ्यो देवेभ्यो मरुद्भ्यःस्वर्केभ्यश्च०।ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विम-ध्यम्ँ श्रथाय। अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय० । एताः प्रायश्चित्तसंज्ञकाः ॥ ततोऽन्वारब्धं विना ॐप्रजापतये स्वाहा इदं प्रजापतये०।ॐ अग्नये स्विष्टकृते स्वा इदमग्नये स्विष्टकृते उदकोपस्पर्शनम्। अथ राष्ट्रभृतः।

---

१ समस्त आहुतियों के अन्त में त्याग वाक्य स्वयं वर को ही उच्चारण करना चाहिये। कारण कि इस होम में यजमान वर ही है। चौदह आहुतियों के पीछे ब्रह्मा के अन्वारब्ध किये विना ही आहुतियें प्रदान करनी उचित हैं। यहां जिस जिस स्थान में उदकोपस्पर्शन लिखा है वहां वहां दाहिने हाथ से प्रणीता के जल का स्पर्श करना चाहिये।

ऋताषाडृतधामाग्निर्गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदमृतासाहे ऋतधाम्नेऽग्नये गंधर्वाय० १। ॐ ऋताषाडृतधामाग्निर्गंधर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा इदमोषधीभ्योऽप्सरोभ्यो मुद्भ्यो० २। ॐ सꣳहितो विश्वसामा सूर्यो गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं सꣳहिताय विश्वसाम्ने सूर्याय गंधर्वाय० ३ । ॐ सꣳहितो विश्वसामा सूर्यो गंधर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो० ४ । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं सुषुम्णाय सूर्यरश्मये चंद्रमसे गंधर्वाय० ५ । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम

ॐ ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय० १।ॐ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदोनामताभ्यः स्वाहा इदमोषधीभ्योऽप्सरोभ्यो मुद्भ्यो०२। ॐ सꣳहितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं सꣳहिताय विश्वासाम्ने सूर्याय गन्धर्वाय० ३ । ॐ सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो० ४ । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय०५ । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम

ताभ्यः स्वाहा इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यो० ६ ॐ इषिरो विश्वव्यचा वातो गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदमिषिराय विश्वव्यचसे वाताय गंधर्वाय० ७ । ॐ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा इदमद्भ्योऽप्सरोभ्य ऊर्भ्यो० ८ । ॐ भुज्युः सुपर्णो यज्ञो गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं भुज्यवे सुपर्णाय यज्ञाय गंधर्वाय० ९ । ॐ भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा इदं दक्षिणाभ्योऽप्सरोभ्यः स्तावाभ्यो ० १० ॐ प्रजापतिर्विश्वकर्मा मनो गंधर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये विश्वकर्मणे मनसे गंधर्वाय० ११ । ॐ प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्-

---

ताभ्यः स्वाहा इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरीभ्यो ६।ॐ इषिरो विश्वव्यचा वातोगन्धर्वःस न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट् इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय० ७। ॐ इषिरो विश्वब्यचा वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा इदमद्भ्योऽप्सरोभ्य ऊर्भ्यो० ८। ॐ भुज्यः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय० ९ ॐ भुज्यः सुपर्णो यज्ञो गन्धर्व स्तस्य दक्षिणा अप्सरसस्ताव नाम ताभ्यः स्वाहा इदं दक्षिणाभ्योऽप्सरोभ्यः स्तावाभ्यो० १०। ॐ प्रजापतिर्विश्वकर्मामनोगन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय ११।ॐ प्रजाप्रतिविश्वकर्मा म-

